# ॥ अद्वैतमकरन्दः ॥

## || advaitamakarandaḥ ||

कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।

अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥ १ ॥

kaṭākṣakiraṇācāntanamanmohābdhaye namaḥ |
anantānandakṛṣṇāyajaganmaṅgalamūrtaye || 1 ||

अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।

ब्रह्मैवाहमतः सिद्धं सच्चिदानन्दलक्षणम् ॥ २ ॥

ahamasmi sadā bhāmi kadācinnāhamapriyaḥ |
brahmaivāhamataḥ siddhaṁ saccidānandalakṣaṇam || 2 ||

मय्येवोदेति चिद्व्योम्नि जगद्गन्धर्वपत्तनम् ।

अतोऽहं न कथं ब्रह्म सर्वज्ञं सर्वकारणम् ॥ ३ ॥

mayyevodeti cidyomni jagadgandharvapattanam |
ato'haṁ na kathaṁ brahma sarvajñaṁ sarvakāraṇam || 3 ||

न स्वतः प्रत्यभिज्ञानात् निरंशत्वान्न चान्यतः ।

न चाश्रयविनाशान्मे विनाशः स्यादनाश्रयात् ॥ ४ ॥

na svataḥ pratyabhijñānāt niraṁśatvānna cānyataḥ |
na cāśrayavināśānme vināśaḥ syādanāśrayāt || 4 ||

न शोषप्लोषविक्लेदच्छेदाश्चिन्नभसो मम ।

सत्यैरप्यनिलाग्न्यम्भः शस्त्रैः किमुत कल्पितैः ॥ ५ ॥

na śoṣaploṣavikledacchedāścinnabhaso mama |
satyairapyanilāgnyambhaḥ śastraiḥ kimuta kalpitaiḥ || 5 ||

अभारूपस्य विश्वस्य भानं भासंनिधेर्विना ।

कदाचिन्नावकल्पेत भा चाहं तेन सर्वगः ॥ ६ ॥

abhārūpasya viśvasya bhānaṁ bhāsannidhervinā |
kadācinnāvakalpeta bhā cāhaṁ tena sarvagaḥ || 6 ||

न हि भानादृते सत्त्वं नर्ते भानं चितोऽचितः ।

चित्संभेदोऽपि नाध्यासादृते तेनाहमद्वयः ॥ ७ ॥

na hi bhānādṛte sattvaṁ narte bhānaṁ cito'citaḥ |
citsambhedo'pi nādhyāsādṛte tenāhamadvayaḥ || 7 ||

न देहो नेन्द्रियं चाहं न प्राणो न मनो न धीः ।

ममतापरिरब्धत्वादाक्रीडत्वादिदंधियः ॥ ८ ॥

na deho nendriyaṁ cāhaṁ na prāṇo na mano na dhīḥ |
mamatāparirabdhatvādākrīḍatvādidandhiyaḥ || 8 ||

साक्षी सर्वान्वितः प्रेयानहं नाहं कदाचन ।

परिणामपरिच्छेदपरितापैरुपप्लवात् ॥ ९ ॥

sākṣī sarvānvitaḥ preyānahaṁ nāhaṁ kadācana |
pariṇāmaparicchedaparitāpairupaplavāt || 9 ||

सुप्तेऽहमि न दृश्यन्ते दुःखदोषप्रवृत्तयः ।

अतस्तस्यैव संसारो न मे संसर्तृसाक्षिणः ॥ १० ॥

supte'hami na dṛśyante duḥkhadoṣapravṛttayaḥ |
atastasyaiva saṁsāro na me saṁsartṛsākṣiṇaḥ || 10 ||

सुप्तः सुप्तिं न जानाति नासुप्ते स्वप्नजागरौ ।

जाग्रत्स्वप्नसुषुप्तीनां साक्ष्यतोऽहमतद्दृशः ॥ ११ ॥

suptaḥ suptiṁ na jānāti nāsupte svapnajāgarau |
jāgratsvapnasuṣuptīnāṁ sākṣyato'hamatadṛśaḥ || 11 ||

विज्ञानविरतिः सुप्तिस्तज्जन्म स्वप्नजागरौ ।

तत्साक्षिणः कथं मे स्युर्नित्यज्ञानस्य ते त्रयः ॥ १२ ॥

vijñānaviratiḥ suptistajjanma svapnajāgarau |
tatsākṣiṇaḥ kathaṁ me syurnityajñānasya te trayaḥ || 12 ||

षड्विकारवतां वेत्ता निर्विकारोऽहमन्यथा ।

तद्विकारानुसंधानं सर्वथा नावकल्पते ॥ १३ ॥

ṣaḍvikāravatāṁ vettā nirvikāro'hamanyathā ǀ
tadvikārānusandhānaṁ sarvathā nāvakalpate ǀǀ 13 ǀǀ

तेन तेन हि रूपेण जायते लीयते मुहुः ।

विकारिवस्तुनस्तेषामनुसन्धातृता कुतः ॥ १४ ॥

tena tena hi rūpeṇa jāyate līyate muhuḥ ǀ
vikārivastunasteṣāmanusandhātṛtā kutaḥ ǀǀ 14 ǀǀ

न च स्वजन्म नाशं वा द्रष्टुमर्हति कश्चन ।

तौ हि प्रागुत्तराभावचरमप्रथमक्षणौ ॥ १५ ॥

na ca svajanma nāśaṁ vā draṣṭumarhati kaścana ǀ
tau hi prāguttarābhāvacaramaprathamakṣaṇau ǀǀ 15 ǀǀ

न प्रकाशेऽहमित्युक्तिर्यत्प्रकाशनिबन्धना ।

स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् ॥ १६ ॥

na prakāśe'hamityuktiryatprakāśanibandhanā ǀ
svaprakāśaṁ tamātmānamaprakāśaḥ kathaṁ spṛśet ǀǀ 16 ǀǀ

तथाप्याभाति कोऽप्येष विचाराभावजीवनः ।

अवश्यायश्चिदाकाशे विचारार्कोदयावधिः ॥ १७ ॥

tathāpyābhāti ko'pyeṣa vicārābhāvajīvanaḥ ।
avaśyāyaścidākāśe vicārārkodayāvadhiḥ || 17 ||

आत्माज्ञानमहानिद्राजृम्भितेऽस्मिञ्जगन्मये ।

दीर्घस्वप्ने स्फुरन्त्येते स्वर्गमोक्षादिविभ्रमाः ॥ १८ ॥

ātmājñānamahānidrājṛmbhite'smiñjaganmaye ।
dīrghasvapne sphurantyete svargamokṣādivibhramāḥ || 18 ||

जडाजडविभागोऽयमजडे मयि कल्पितः ।

भित्तिभागे समे चित्रचराचरविभागवत् ॥ १९ ॥

jaḍājaḍavibhāgo'yamajaḍe mayi kalpitaḥ ।
bhittibhāge same citracarācaravibhāgavat || 19 ||

चेत्योपरागरूपा मे साक्षिताऽपि न तात्त्विकी ।

उपलक्षणमेवेयं निस्तरङ्गचिदम्बुधेः ॥ २० ॥

cetyoparāgarūpā me sākṣitā'pi na tāttvikī ।
upalakṣaṇameveyaṁ nistaraṅgacidambudheḥ || 20 ||

अमृताब्धेर्न मे जीर्णिर्मृषाडिण्डीरजन्मभिः ।

स्फटिकाद्रेर्न मे रागस्स्वाप्नसन्ध्याभ्रविभ्रमैः ॥ २१ ॥

amṛtābdherna me jīrṇirmṛṣāḍiṇḍīrajanmabhiḥ |
sphaṭikādrerna me rāgassvāpnasandhyābhravibhramaiḥ || 21 |

स्वरूपमेव मे सत्त्वं न तु धर्मो नभस्त्ववत् ।

मदन्यस्य सतोऽभावान्न हि सज्जातिरिष्यते ॥ २२ ॥

svarūpameva me sattvaṁ na tu dharmo nabhastvavat |
madanyasya sato'bhāvānna hi sajjātiriṣyate || 22 ||

स्वरूपमेव मे ज्ञानं न गुणः स गुणो यदि ।

अनात्मत्वमसत्त्वं वा ज्ञेयाज्ञेयत्वयोः पतेत् ॥ २३ ॥

svarūpameva me jñānaṁ na guṇaḥ sa guṇo yadi |
anātmatvamasattvaṁ vā jñeyājñeyatvayoḥ patet || 23 ||

अहमेव सुखं नाऽन्यदन्यच्चेन्नैव तत्सुखम् ।

अमदर्थं न हि प्रेयो मदर्थं न स्वतः प्रियम् ॥ २४ ॥

ahameva sukhaṁ nā'nyadanyaccennaiva tatsukham |
amadarthaṁ na hi preyo madarthaṁ na svataḥ priyam || 24 ||

न हि नानास्वरूपं स्यादेकं वस्तु कदाचन ।

तस्मादखण्ड एवास्मि विजहज्जागतीं भिदाम् ॥ २५ ॥

na hi nānāsvarūpaṁ syādekaṁ vastu kadācana |
tasmādakhaṇḍa evāsmi vijahajjāgatīṁ bhidām || 25 ||

परोक्षतापरिच्छेदशाबल्यापोहनिर्मलम् ।

तदासीति गिरा लक्ष्यमहमेकरसं महः ॥ २६ ॥

parokṣatāparicchedaśābalyāpohanirmalam |
tadāsīti girā lakṣyamahamekarasaṁ mahaḥ || 26 ||

उपशान्तजगज्जीवशिष्याचार्येश्वर भ्रमम् ।

स्वतस्सिद्धमनाद्यन्तं परिपूर्णमहं महः ॥ २७ ॥

upaśāntajagajjīvaśiṣyācāryeśvara bhramam |
svatassiddhamanādyantaṁ paripūrṇamahaṁ mahaḥ || 27 ||

लक्ष्मीधरकवेः सूक्तिशरदम्भोजसम्भृतः ।

अद्वैतमकरन्दोऽयं विद्वद् भृङ्गैर्निपीयताम् ॥ २८ ॥

lakṣmīdharakaveḥ sūktiśaradambhojasambhṛtaḥ |
advaitamakarando'yaṁ vidvad bhṛṅgairnipīyatām || 28 ||